# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा -शास्त्रितृतीयवर्षम्** (SEM-5) | **प्रश्नपत्रम् – ५** (C.C.- 3.5.9. New ) | **गुणाः - ७०** |
| **विषयः - स्वामिनारायणवेदान्तः - J** | | |
| **दिनाङ्कः - ०८/१२/२०१८** | **हरिवाक्यसुधासिन्धुः** | **समयः -१०.०० तः १.००** |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम् ।** **( १० )**

(१) द्वादशतरङ्गानुसारं सृष्ट्युत्पत्तिक्रमं प्रदर्शयत ।

(२) द्वादशतरङ्गानुसारं पञ्चभूतानां लक्षणानि लिखत ।

(३) प्रकृतेः लक्षणं द्वादशतरङ्गानुगुणमुपपादयत ।

**प्रश्नः २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **( १० )**

(१) प्रकृतेः चतुर्विंशतितत्त्वानां लक्षणानि द्वादशतरङ्गानुगुणं लिखत ।

(२) लौकिकेन्द्रियेभ्यः भगवत्साक्षात्कारो भवति वा न वा ? यथाग्रन्थं स्पष्टयत ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव प्रश्नौ समाधेयौ ।** **( १० )**

(१) सप्तत्रिंशत्तरङ्गे भगवतोक्तं देशवासनायाः स्वरूपं निरूपयत ।

(२) भगवच्चरित्रस्मरणं कथं कर्तव्यम् ? अष्टत्रिंशत्तरङ्गमनुसृत्य लिखत ।

(३) अष्टात्रिंशत्तरङ्गानुसारं जीवात्मनः स्वरूपं प्रतिपादयत ।

**प्रश्नः ४ निम्नलिखितेषु एक एव समाधेयः ।** **( १० )**

(१) पञ्चनवतिस्तरङ्गस्य सारतत्त्वं सङ्गृह्णीत ।

(२) भगवता श्रीस्वामिनारायणेनोक्तानि त्यागिनां लक्षणानि लिखत ।

**तृतीयान्वितिः**

**प्रश्नः ५ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम् ।** **( १० )**

(१) मायां के तरन्ति ? यथाग्रन्थमुपपादयत ।

(२) विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ इति श्लोकं सेतुमालाटीकानुगुणं व्याख्यात ।

(३) दुःखदायिन्याः मायायाः हरिवाक्यसिन्ध्वनुसारम् उपपादयत ।

**प्रश्नः ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **( १० )**

(१) कर्मभेदेन जीवानां वृत्तिभेदमुपदर्शयत ।

(२) प्रपत्तेः माहात्म्यं यथाग्रन्थं लिखत ।

**प्रश्नः ७ अधोनिर्दिष्टेषु प्रश्नेषु केचन दशप्रश्नाः समाधेयाः ।** **( १० )**

(१) हरिवाक्यसुधासिन्धुः – इति नाम्नः किमौचित्यम् ?

(२) हरिवाक्यसुधासिन्धोः रचयिता कः ?

(३) हरिवाक्यसुधासिन्धौ कति तरङ्गाः सन्ति ?

(४) का नाम भक्तिः ?

(५) मिथिलायां प्रदीप्तायां न मे दह्यति किञ्चन – इति कस्य वचनम् ?

(६) समाधेः द्वैविध्यं कस्मिन् तरङ्गे निरूपितम् ?

(७) श्रवणं कीर्तनं.........॥ इतीमं श्लोकं पूरयत ?

(८) हरिवाक्यसुधासिन्धुः कस्य ग्रन्थस्य संस्कृतपद्यानुवादः ?

(९) मायायाः त्रिगुणाः के ?

(१०) भगवत्प्रसन्नताहेतुभूतेषु साधनेषु किमुत्कृष्टम् ?

(११) विषया विनिवर्तन्ते निराहारस्य देहिनः – इति कस्य ग्रन्थस्य वचनम् ?

(१२) दुर्गपत्तनीयान्त्यप्रकरणे कति तरङ्गाः सन्ति ?

(१३) पञ्चमहाभूतानि कानि ?

(१४) रजसः लक्षणं किम् ?

(१५) सेतुमाला टीका केन विरचिता ?

--००--